श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्भागवते षष्ठस्कन्धे

# ॥ श्रीनारायण कवचम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीनारायण कवचम् ॥

राजोवाच

यया गुप्तस्सहस्राक्षः सवाहान् रिपुसैनिकान्।
क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम्॥ 1 ॥

भगवंस्तन्ममाख्याहि वर्म नारायणात्मकम्।
यथाऽऽततायिनः शत्रून् येन गुप्तोऽजयन्मृधे॥ 2 ॥

श्री शुक उवाच

वृतः पुरोहितस्त्वाष्ट्रो महेन्द्रायानुपृच्छते।
नारायणाख्यं वर्माह तदिहैकमनाः शृणु॥ 3 ॥

विश्वरूप उवाच

धौताङ्घ्रिपाणिराचम्य सपवित्र उदङ्मुखः।
कृतस्वाङ्गकरन्यासो मन्त्राभ्यां वाग्यतः शुचिः॥ 4 ॥

नारायणमयं वर्म सन्नह्येद् भय आगते।
पादयोर्जानुनोरुर्वोः उदरे हृद्यथोरसि॥ 5 ॥

मुखे शिरस्यानुपूर्व्यादोङ्कारादीनि विन्यसेत्।
ओं नमो नारायणायेति विपर्ययमथापि वा॥ 6 ॥

करन्यासं ततः कुर्यात् द्वादशाक्षर विद्यया।
प्रणवादियकारान्तं अङ्गुल्यङ्गुष्ठपर्वसु॥ 7 ॥

न्यसेद्धृदय ओङ्कारं विकारमनु मूर्धनि।
षकारं तु भ्रुवोर्मध्ये णकारं शिखया दिशेत्॥ **8**॥

वेकारं नेत्रयोर्युञ्ज्यात् नकारं सर्वसन्धिषु।
मकारमस्त्रमुद्दिश्य मन्त्रमूर्तिर्भवेत् बुधः॥ **9**॥

सविसर्गं फडन्तं तत् सर्वदिक्षु विनिर्दिशेत्।
ओं विष्णवे नम इति॥ **10**॥

आत्मानं परमं ध्यायेत् ध्येयं षड्शक्तिभिर्युतम्।
विद्यातेजस्तपोमूर्तिमिमं मंत्रमुदाहरेत्॥ **11**॥

ओं हरिर्विदध्यान्मम सर्वरक्षां
    न्यस्ताङ्घ्रिपद्मः पतगेन्द्रपृष्ठे।
दरारिचर्मासिगदेषुचाप -
    पाशान् दधानोऽष्टगुणोऽष्टबाहुः॥ **12**॥

जलेषु मां रक्षतु मत्स्यमूर्तिः
    यादोगणेभ्यो वरुणस्य पाशात्।
स्थलेषु मायावटुवामनोऽव्यात्
    त्रिविक्रमः खेऽवतु विश्वरूपः॥ **13**॥

दुर्गेष्वटव्याजिमुखादिषु प्रभुः
    पायान्नृसिंहोऽसुरयूथपारिः।
विमुञ्चतो यस्य महाट्टहासं
    दिशो विनेदुर्न्यपतंश्च गर्भाः॥ **14**॥

रक्षत्वसौ माध्वनि यज्ञकल्पः
    स्वदंष्ट्रयोन्नीतधरोवराहः।

रामोऽद्रिकूटेष्वथ विप्रवासे
सलक्ष्मणोऽव्यात् भरताग्रजोऽस्मान्॥ **15** ॥

मामुग्रधर्मादखिलात् प्रमादात्
नारायणः पातु नरश्च हासात्।
दत्तस्त्वयोगादथ योगनाथः
पायात् गुणेशः कपिलः कर्मबन्धात्॥ **16** ॥

सनत्कुमारोऽवतु कामदेवात्
हयशीर्षा मां पथि देवहेलनात्।
देवर्षिवर्यः पुरुषार्चनान्तरात्
कूर्मो हरिर्मां निरयादशेषात्॥ **17** ॥

धन्वन्तरिर्भगवान् पात्वपथ्यात्
द्वन्द्वाद्भयादृषभो निर्जितात्मा।
यज्ञश्च लोकादवताज्जनान्तात्
बलो गणात् क्रोधवशादहीन्द्रः॥ **18** ॥

द्वैपायनो भगवानप्रबोधात्
बुद्धस्तु पाखण्डगणात् प्रमादात्।
कल्किः कलेः कालमलात् प्रपातु
धर्मावनायोरुकृतावतारः॥ **19** ॥

मां केशवो गदया प्रातरव्यात्
गोविन्द आसङ्गवमात्तवेणुः।
नारायणः प्राह्ण उदात्तशक्तिः
मध्यन्दिने विष्णुररीन्द्रपाणिः॥ **20** ॥

देवोऽपराह्णे मधुहोग्रधन्वा
सायं त्रिधामावतु माधवो माम्।
दोषे हृषीकेश उतार्धरात्रे
निशीथ एकोऽवतु पद्मनाभः॥ **21** ॥

श्रीवत्सधामा पररात्र ईशः
प्रत्यूष ईशोऽसिधरो जनार्दनः।
दामोदरोऽव्यादनुसन्ध्यं प्रभाते
विश्वेश्वरो भगवान् कालमूर्तिः॥ **22** ॥

चक्रं युगान्तानलतिग्मनेमि
भ्रमत् समन्तात् भगवत्प्रयुक्तम्।
दन्दग्धि दन्दग्ध्यरि सैन्यमाशु
कक्षं यथा वातसखो हुताशः॥ **23** ॥

गदेऽशनिस्पर्शनविस्फुलिङ्गे
निष्पिण्ढि निष्पिण्ढ्यजितप्रियासि।
कूष्माण्डवैनायकयक्षरक्षो
भूतग्रहांश्चूर्णय चूर्णयारीन्॥ **24** ॥

त्वं यातुधान प्रमथ प्रेतमातृ
पिशाचविप्रग्रहघोरदृष्टीन्।
दरेन्द्र विद्रावय कृष्णपूरितो
भीमस्वनोऽरेर्हृदयानि कम्पयन्॥ **25** ॥

त्वं तिग्मधारासिवरारिसैन्यं
ईशप्रयुक्तो मम छिन्धि छिन्धि।
चक्षूंषि चर्मञ्छतचन्द्र छादय
द्विषामघोनां हर पापचक्षुषाम्॥ **26** ॥

यन्नो भयं ग्रहेभ्योऽभूत् केतुभ्यो नृभ्य एव च।
सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योऽंहोभ्य एव वा॥ **27** ॥

सर्वाण्येतानि भगवन् नामरूपास्त्रकीर्तनात्।
प्रयान्तु संक्षयं सद्यो ये नः श्रेयःप्रतीपकाः॥ **28** ॥

गरुडो भगवान् स्तोत्रस्तोभश्छन्दोमयः प्रभुः।
रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः॥ **29** ॥

सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः।
बुद्धीन्द्रियमनः प्राणान् पान्तु पार्षदभूषणाः॥ **30** ॥

यथा हि भगवानेव वस्तुतः सदसच्च यत्।
सत्येनानेन नः सर्वे यान्तु नाशमुपद्रवाः॥ **31** ॥

यथैकात्म्यानुभावानां विकल्परहितः स्वयम्।
भूषणायुधलिङ्गाख्या धत्ते शक्तीः स्वमायया॥ **32** ॥

तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः।
पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः॥ **33** ॥

विदिक्षु दिक्षूर्ध्वमधः समन्तात्
अन्तर्बहिर्भगवान् नारसिंहः।
प्रहापयन् लोकभयं स्वनेन
स्वतेजसा ग्रस्तसमस्ततेजाः॥ **34** ॥

मघवन्निदमाख्यातं वर्म नारायणात्मकम्।
विजेष्यस्यञ्जसा येन दंशितोऽसुरयूथपान्॥ **35** ॥

एतत् धारयमाणस्तु यं यं पश्यति चक्षुषा।
पदा वा संस्पृशेत् सद्यः साध्वसात् स विमुच्यते॥ **36** ॥

न कुतश्चिद् भयं तस्य विद्यां धारयतो भवेत्।
राजदस्युग्रहादिभ्यो व्याघ्रादिभ्यश्च कर्हिचित्॥ 37॥

इमां विद्यां पुरा कश्चित् कौशिको धारयन् द्विजः।
योगधारणया स्वाङ्गं जहौ स मरुधन्वनि॥ 38॥

तस्योपरि विमानेन गन्धर्वपतिरेकदा।
ययौ चित्ररथः स्त्रीभिः वृतो यत्र द्विजक्षयः॥ 39॥

गगनान्न्यपतत् सद्यः सविमानो ह्यवाक्शिराः।
स वालखिल्यवचनात् अस्थीन्यादाय विस्मितः।
प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात्॥ 40॥

श्री शुक उवाच
य इदं शृणुयात् काले यो धारयति चादृतः।
तं नमस्यन्ति भूतानि मुच्यते सर्वतो भयात्॥ 41॥

एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः।
त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान्॥ 42॥

॥ इति श्रीनारायण कवचम् समाप्तम्॥